# Bilvapushpapanchamritadhanyajaladharadishivapujaphalavarnanam

# બિલ્વપુષ્પપઞ્ચામૃતધાન્યજલધારાદિશિવપૂજાફલવર્ણનમ્

## Document Information

Text title : Munayah Proktam Bilvapushpapanchamritadhanyajaladharadishivapujaphalavarnanam

File name : bilvapuShpapanchAmRRitadhAnyajaladhArAdishivapUjAphalavarNanam.itx

Category : shiva, shivarahasya, pUjA

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shivarahasyam | harAkhyaH tRitIyAMshaH | uttarArdham | adhyAyaH 24 | 91-143 ||

Latest update : February 1, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 1, 2024

*sanskritdocuments.org*

# બિલ્વપુષ્પપઞ્ચામૃતધાન્યજલધારાદિશિવપૂજાફલવર્ણનમ્

મુનયઃ -
સાધુ પૃષ્ટમિદં પ્રાજ્ઞાઃ શિવપૂજનસાધનમ્ ।
શિવાર્ચનસ્વરૂપં ચ વેદોક્તમધુનોચ્યતે ॥ ૯૧॥

- -
સ્નાત્વા જલૈઃ સમુદ્ધૃલ્ય ભસ્મનાઽઙ્ગાનિ સાદરમ્ ।
અગ્નિરિત્યાદિભિર્મન્ત્રૈઃ કૃત્વા ભસ્માભિમન્ત્રણમ્ ॥ ૯૨॥

ત્રિપુણ્ડ્રધારણં કૃત્વા કૃત્વા રુદ્રાક્ષધારણમ્ ।
બિલ્વમૂલે સન્નિવિશ્ય જપ્ત્વા મન્ત્રં ષડક્ષરમ્ ॥ ૯૩॥

બિલ્વવૃક્ષ નમસ્તેઽસ્તુ શિવપૂજનસાધન ।
મૂલતો ભવરૂપાય મધ્યતો મૃડરૂપિણે ॥ ૯૪॥

અગ્રતઃ શિવરૂપાય પત્રૈર્વેદસ્વરૂપિણે ।
સ્કન્ધે વેદાન્તરૂપાય તરુરાજાય તે નમઃ ॥ ૯૫॥

નમસ્તે બિલ્વતરવે ભાનુસોદર તે નમઃ ।
શિવપૂજોદ્યતાભીષ્ટસાધનાય નમો નમઃ ॥ ૯૬॥

ઇતિ સમ્પ્રાર્થ્ય તં બિલ્વં નત્વા કૃત્વા પ્રદક્ષિણમ્ ।
કૃતાઞ્જલિપુટો ભૂત્વા પ્રાર્થયેત્ પુનરાદરાત્ ॥ ૯૭॥

વેદરૂપાણિ પત્રાણિ શિવપૂજાર્થમદ્ય તે ।
પ્રાર્થયામીતિ સમ્પ્રાર્થ્ય ભવેત્ તદ્ગ્રહણોદ્યતઃ ॥ ૯૮॥

રુદ્રાધ્યાયં જપન્નેવ સ્મરન્નન્તે મહેશ્વરમ્ ।
ગૃહીત્વા બિલ્વપત્રાણિ પૂજયેગદ્રિરિજાપતિમ્ ॥ ૯૯॥

સુબિલ્વપત્રપૃષ્ટેન યોજયેલિઙ્ગમસ્તકમ્ ।
ઉત્તાનૈઃ પૂજયેત્પત્રૈઃ ઉત્તરાગ્રૈર્જલાન્વિતૈઃ ॥ ૧૦૦॥

યથોત્પન્નેન પુષ્પેણ પૂજયેત્ ગિરિજાપતિમ્ ।
સર્વાત્મના વૃન્તહીનં બૃહતીપુષ્પમર્ચયેત્ ॥ ૧૦૧॥

વૃન્તહીનાનિ પદ્માનિ કુમુદાનિ નવાન્યપિ ।
શિવપૂજોપયુક્તાનિ નાન્યાનીત્યવધારિતમ્ ॥ ૧૦૨॥

ચમ્પકામલ્લિકાજાતી કરવીરાદિકાનિ તુ ।
યથેષ્ટમેવ દેયાનિ સિતાન્યપ્યસિતાન્યપિ ॥ ૧૦૩॥

અર્કં વા કરવીરં વા બકં કનકમેવ વા ।
દત્વા લિઙ્ગે શિવં સ્મૃત્વા ભક્ત્યા પાપૈઃ પ્રમુચ્યતે ॥ ૧૦૪॥

નવારુણૈઃ બિલ્વપત્રૈઃ પૂજયિત્વા મહેશ્વરમ્ ।
બ્રહ્મહાપિ વિમુક્તઃ સ્યાત્ ભૂતિરુદ્રાક્ષભૂષણઃ ॥ ૧૦૫॥

ઉદ્ધૂલ્ય ભસ્મનાઙ્ગાનિ ધૃત્વા તિર્યક્ ત્રિપુણ્ડ્રકમ્ ।
બિલ્વપત્રૈઃ સમભ્યર્ચ્ય મુક્તો ભવતિ માનવઃ ॥ ૧૦૬॥

ભક્ત્યા દત્વા મહેશાય કોમલં બિલ્વપલ્લવમ્ ।
કૈલાસં સમવાપ્નોતિ ગૃહં ગૃહપતિર્યથા ॥ ૧૦૭॥

સન્તિ પત્રાણ્યનેકાનિ પ્રસૂનાન્યપિ કોટિશઃ ।
બિલ્વપત્રાર્પણેનૈવ તુષ્ટો ભવતિ શઙ્કરઃ ॥ ૧૦૮॥

એકસ્ય બિલ્વપત્રસ્ય શિવલિઙ્ગે પ્રદાનતઃ ।
યત્ પુણ્યં સમવાપ્નોતિ તદ્વદેદ્ગિરિજાપતિઃ ॥ ૧૦૯॥

બિલ્વપત્ર પ્રદાનસ્ય ફલમેતાવદિત્યપિ ।
વેદૈરપિ ન વિજ્ઞાતં અન્યેષાં તત્ર કા કથા ॥ ૧૧૦॥

બિલ્વે ભસ્મનિ રુદ્રાક્ષે શઙ્કરસ્ય યથા રુચિઃ ।
તથા રુચિર્ભવાન્યાં તુ તથાઽન્યેષુ રુચિર્ન તુ ॥ ૧૧૧॥

અખણ્ડાનિ સખણ્ડાનિ બિલ્વપત્રાણિ તેષ્વપિ ।
અતિપ્રીતિરખણ્ડેષુ દુર્લભાન્યેવ તાનિ તુ ॥ ૧૧૨॥

લિઙ્ગાનિ દુર્લભાન્યેવ બિલ્વપત્રાણ્યપિ સ્વતઃ ।
સુલભાનિ ભવન્ત્યેવ ક્વચિત્ ભાગ્યવતાં નૃણામ્ ॥ ૧૧૩॥

નવાનિ બિલ્વપત્રાણિ દુર્લભાનિ ભવન્તિ ચેત્ ।
અનવાન્યપિ સમ્પાદ્ય પૂજયેત્ તૈરુમાપતિમ્ ॥ ૧૧૪॥

બિલ્વપત્રાણિ દેયાનિ શુષ્કાણિ પતિતાન્યપિ ।
ભિન્નાન્યપિ નવાભાવે છિદ્રાણ્યપિ કદાચન ॥ ૧૧૫॥

યાવત્તદ્રક્ષણં શક્યં તાવત્કૃત્વૈવ સાદરમ્ ।
દેયં બિલ્વં મહેશાય તચ્ચૂર્ણમપિ તત્પ્રિયમ્ ॥ ૧૧૬॥

દુર્લભં બિલ્વચૂર્ણં ચેત્ બિલ્વચન્દનમેવ વા ।
દદ્યાન્નિત્યં મહેશાય તેન તુષ્યતિ શઙ્કરઃ ॥ ૧૧૭॥

બિલ્વપત્રૈરનભ્યર્ચ્ય તચ્ચૂર્ણૈરપિ ચન્દનૈઃ ।
ન ભોક્તવ્યં ન શેતવ્યં કદાપિ દ્વિજજન્મના ॥ ૧૧૮॥

અપરાણિ સુગન્ધીનિ પ્રસૂનાનિ મહેશ્વરઃ ।
બિલ્વાભાવે ન ગૃહ્ણાતિ તેન પ્રીતઃ સદાશિવઃ ॥ ૧૧૯॥

સૂર્યાભાવે યથા ધ્વાન્તં ન નશ્યતિ તથા સુરાઃ ।
બિલ્વપત્રાર્ચનાભાવે ન પાપં યાતિ સર્વથા ॥ ૧૨૦॥

બિલ્વીતરુજવાતે વા યા પ્રીતિર્ગિરિજાપતેઃ ।
સા પ્રીતિઃ પુષ્પવાતેઽપિ શઙ્કરસ્ય ન જાયતે ॥ ૧૨૧॥

સૂર્યઃ સૃષ્ટો મહેશેન ધ્વાન્તસંહરણાય સઃ ।
બિલ્વઃ સૃષ્ટઃ શિવેનૈવ પાપનાશાય કેવલમ્ ॥ ૧૨૨॥

આદિત્યઃ સમભૂત્ સોમાત્ સોમાદ્બિલ્વઃ પ્રજાયતે ।
ઉમયા સહિતઃ સોમઃ સ તયોર્જનકો યતઃ ॥ ૧૨૩॥

નીલોત્પલકૃતાં માલાં શઙ્કરાય સમર્ચયેત્ ।
પ્રફુલ્લપદ્મમાલાં ચ કુડ્મલૈર્નાર્ચયેત્ શિવમ્ ॥ ૧૨૪॥

કરવીરપ્રસૂનાનિ પ્રક્ષિપ્ય લિઙ્ગમસ્તકે ।
મુચ્યતે પાતકૈઃ સર્વૈઃ બ્રહ્મહત્યાદિભિઃ સુરાઃ ॥ ૧૨૫॥

કરવીરપ્રસૂનેન યો નાર્ચયતિ શઙ્કરમ્ ।
સ દરિદ્રો ભવત્યેવ સવંશઃ પ્રતિજન્મનિ ॥ ૧૨૬॥

મન્દારૈઃ કનકૈર્વાપિ યઃ સાયં શિવમર્ચયેત્ ।
સ મુક્તઃ પાપકોટિભ્યો મુક્તો ભવતિ માનવઃ ॥ ૧૨૭॥

બૃહતીકુસુમૈર્નિત્યં યોઽર્ચયેત્ ગિરિજાપતિમ્ ।

અસ્થૂલૈરપિ વા સ્થૂલૈઃ મુચ્યતે પાપબન્ધનાત્ ॥ ૧૨૮॥

યઃ પ્રયચ્છતિ શર્વાય ફુલ્લ્લાં પઙ્કજમાલિકામ્ ।
સાયઙ્કાલે વિશેષેણ સ યાતિ શિવમન્દિરમ્ ॥ ૧૨૯॥

પુભાગમાલિકાં દત્વા મહેશાય નિશામુખે ।
મુચ્યતે પાપકોટિભ્યઃ સદ્ય એવ ન સંશયઃ ॥ ૧૩૦॥

શતપત્રપ્રસૂનાનિ યઃ પ્રયચ્છતિ શઙ્કરે ।
દ્રોણપુષ્પાણિ વા નિત્યં સ યાતિ શિવમન્દિરમ્ ॥ ૧૩૧॥

પારિજાતપ્રસૂનાનિ યો દદાતિ મહેશ્વરે ।
વકુલાન્યપિ પૂતાત્મા સ મુક્તો ભવતિ ધ્રુવમ્ ॥ ૧૩૨॥

યઃ પૂજયેન્મહાદેવં કુન્દસુન્દરમાલયા ।
સ ગન્ધર્વપતિર્ભૂત્વા પ્રયાતિ શિવમન્દિરમ્ ॥ ૧૩૩॥

અર્ચયિત્વા મહાદેવં કેતકીકુસુમૈર્નિશિ ।
અરાતિભ્યઃ સર્વથાપિ ન બિભેત્યેવ માનવઃ ॥ ૧૩૪॥

દુર્વાઙ્કુરૈર્નવૈઃ શુદ્ધૈરભિપૂજ્ય સદાશિવમ્ ।
સર્વપુષ્પાર્ચનફલં પ્રાપ્નોત્યેવ ન સંશયઃ ॥ ૧૩૫॥

યવતણ્ડુલગોધૂમૈઃ ચણકૈર્દ્વિદલૈરપિ ।
સિતાસિતૈસ્તિલૈરીશં સર્ષપૈશ્ચ સમર્ચયેત્ ॥ ૧૩૬॥

પ્રિયઙ્ગુભિશ્ચ નીવારૈઃ શ્યામાકૈઃ શાલિભિસ્તથા ।
અણુભિશ્ચ સમારાધ્ય મુચ્યતે પાપકોટિભિઃ ॥ ૧૩૭॥

દધ્ના ક્ષીરૈર્ઘૃતેનાપિ મધુના સિતયાઽપિ ચ ।
સમભ્યર્ચ્ય મહાદેવં મુચ્યતે પાપકોટિભિઃ ॥ ૧૩૮॥

હિમશીકરસઙ્કાશનીરધારાભિષેચનમ્ ।
મહાલિઙ્ગે પ્રદોષેષુ મહાપાપૈઃ પ્રમુચ્યતે ॥ ૧૩૯॥

ક્ષીરાજ્યમધુધારાભિઃ યોઽભિષિઞ્ચેદુમાપતિમ્ ।
સ એવ હયમેધાદિયાગકોટિફલં લભેત્ ॥ ૧૪૦॥

આકલ્પાર્જિતપાપનાશકમિતિ જ્ઞેયં શિવારાધનં
સામાન્યેન તદપ્યખણ્ડબિલ્વીદલૈશ્ચેત્કૃતમ્ ।
તત્ કિં કિં ફલમાતનોતિ બહુધા તન્નૈવ જાને નિજં

દાસ્યત્યેવ પદં સદાશિવ ઇતિ જ્ઞાતં તદન્યત્તથા ॥ ૧૪૧॥

મુક્તિપ્રાસાદમાર્ગપ્રથિતમણિલસદ્દીર્ઘસોપાનપઙ્ક્તિઃ
ભક્તિઃ શ્રીપતિનેત્રપૂજિતશિવાકાન્તાઙ્ઘ્રિપઙ્કેરુહે ।
સા ભક્તિર્યદિ બિલ્વપલ્લવલસન્મલ્લીપ્રસૂનાર્પણે
શાઙ્ગે લિઙ્ગવરે તદા જિતમિદં તાવજ્જગજ્જાયતે ॥ ૧૪૨॥

ધન્યૈર્જન્મસહસ્રસાધિતમહાપુણ્યાર્ણવૈઃ કેવલં
ભક્તિઃ શઙ્કરપાદપદ્મભજને તાવત્પરં લભ્યતે ।
સા લબ્ધા જનનાદિદુઃખનિકરં હન્ત્યેવ હન્ત્યાપદાં
રાશીનપ્યમિતાન્ કરોતિ પરમાનન્દાશ્રયં સર્વદા ॥ ૧૪૩॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે મુનયઃ પ્રોક્તં બિલ્વપુષ્પપઞ્ચામૃતધાન્યજલધારાદિશિવપૂજાફલવર્ણનં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । હરાખ્યઃ તૃતીયાંશઃ । ઉત્તરાર્ધમ્ । અધ્યાયઃ ૨૪। ૯૧-૧૪૩ ॥

- .. shrIshivarahasyam . harAkhyaH tRRitIyAMshaH . uttarArdham . adhyAyaH 24. 91-143 ..

Proofread by Ruma Dewan

*Bilvapushpapanchamritadhanyajaladharadishivapujaphalavarnanam*

pdf was typeset on February 1, 2024

Please send corrections to *sanskrit@cheerful.com*